## (673) " णिजिर् शौचपोषणयोः "

(III-जुहोत्यादिः-1093. सक. अनि. उभ.)

'निङ्क्ते, नेनेक्ति नेनिक्ते शौचेऽर्थे पोषणे तथा ॥' (श्लो. 63) इति देवः ।

नेजकः-[1]निर्णेजकः-जिका, नेजकः-जिका, [2]निनिक्षकः-क्षिका, नेनिजकः-जिका;
[3]नेक्ता-त्री, नेजयिता-त्री, निनिक्षिता-त्री, [4]प्रणेनिजिता-त्री ;
[5]नेनिजत्[A]-ती, नेजयन्-न्ती, निनिक्षन्-न्ती ; —
नेक्ष्यन्-न्ती-ती, नेजयिष्यन्-न्ती-ती, निनिक्षिष्यन्-न्ती-ती ; —
नेनिजानः, नेजयमानः, निनिक्षमाणः, नेनिज्यमानः ;
नेक्ष्यमाणः, नेजयिष्यमाणः, निनिक्षिष्यमाणः, नेनिजिष्यमाणः ;
सुनिक्-सुनिग्-सुनिजौ-सुनिजः ; — —
निक्तम्-क्तः-क्तवान्, नेजितः, निनिक्षितः, नेनिजितः-तवान् ;
[6]निजः, नेजः, निनिक्षुः, नेनिजः ;
नेक्तव्यम्, नेजयितव्यम्, निनिक्षितव्यम्, नेनिजितव्यम् ;
नेजनीयम्, नेजनीयम्, निनिक्षणीयम्, नेनिजनीयम् ;

---

1. 'उपसर्गादसमासेऽपि णोपदेशस्य' (8-4-14) इति धातुनकारस्य णकारः। 'निजिर्—' इति धातुप्रदीपादिसम्मते क्वाचित्कपाठे तु णत्वस्याप्रसक्तिरिति ज्ञेयम्। 'निर्णेजकः स्याद् रजकः—' इत्यमरः।
2. अस्य धातोरनुदात्तत्वेनेडभावे, 'हलन्ताच्च' (1-2-10) इति सनः कित्वात् लघूपधगुणो न। 'कुहोश्चुः' (7-4-62) इति कुत्वे, 'आदेशप्रत्यययोः' (8-3-59) इति षत्वे, 'खरि च' (8-4-55) इति चर्त्वम्। एवं सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया।
3. 'एकाच उपदेशेऽनुदात्तात्' (7-2-10) इतीण्णिषेधः। एवं वलाद्यार्धधातुके सर्वत्र ज्ञेयम्। किति प्रत्यये परतः क्तादौ गुणाभावोऽपि बोध्यः।
4. 'उभौ साभ्यासस्य' (8-4-21) इति लिङ्गेन, 'पूर्वत्रासिद्धीयमद्विर्वचने' (परि. 127) इत्यस्यानित्यत्वात् पूर्वं द्वित्वे, अभ्यासघटकस्यैव नकारस्य णत्वं ज्ञेयम्।
5. विकरणप्रत्ययस्य शपः, 'जुहोत्यादिभ्यः श्लुः' (2-4-75) इति श्लौ, 'श्लौ' (6-1-10) इति द्वित्वे, 'निजां त्रयाणां गुणः श्लौ' (7-4-75) इत्यभ्यासस्य गुणः। 'नाभ्यस्ताच्छतुः' (7-1-78) इति नुम्निषेधः। एवम्, नेनिजानः इत्यत्रापि गुणो बोध्यः।
6. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कप्रत्ययः। कित्त्वाच्च गुणः।

A. 'प्रणेनिजद्भिर्मतिमर्थतत्त्वं सुवेविजानैर्यदुभिः स विष्णुः।' धा. का. 2. 55.